श्रीवेदव्यासाष्टकम्

{॥ श्रीवेदव्यासाष्टकम् ॥}

कलिमलास्तविवेकदिवाकरं समवलोक्य तमोवलितं जनम् ।

करुणया भुवि दर्शितविग्रहं मुनिवरं गुरुव्यासमहं भजे ॥ १॥

भरतवंशसमुद्धरणेच्छया स्वजननीवचसा परिनोदितः ।

अजनयत्तनयत्रितयं प्रभुः शुकनुतं गुरुव्यासमहं भजे ॥ २॥

मतिबलादि निरीक्ष्य कलौ नृणां लघुतरं कृपया निगमाम्बुधेः ।

समकरोदिह भागमनेकधा श्रुतिपतिं गुरुव्यासमहं भजे ॥ ३॥

सकलधर्मनिरूपणसागरं विविधचित्रकथासमलङ्कृतम् ।

व्यरचयच्च पुराणकदम्बकं कविवरं गुरुव्यासमहं भजे ॥ ४॥

श्रुतिविरोधसमन्वयदर्पणं निखिलवादिमतान्ध्यविदारणम् ।

ग्रथितवानपि सूत्रसमूहकं मुनिसुतं गुरुव्यासमहं भजे ॥ ५॥

यदनुभाववशेन दिवङ्गतः समधिगम्य महास्त्रसमुच्चयम् ।

कुरूचमूमजयद्विजयो द्रुतं द्युतिधरं गुरुव्यासमहं भजे ॥ ६॥

समरवृत्तविबोधसमीहया कुरुवरेण मुदा कृतयाचनः ।

सपतिसूतमदादमलेक्षणं कलिहरं गुरुव्यासमहं भजे ॥ ७॥

वननिवासपरौ कुरुदम्पति सुतशुचा तपसा च विकर्शितौ ।

मृततनूजगणं समदर्शयन् शरणदं गुरुव्यासमहं भजे ॥ ८॥

व्यासाष्टकमिदं पुण्यं ब्रह्मानन्देन कीर्तितम् ।

यः पठेन्मनुजो नित्यं स भवेच्छास्त्रपारगः ॥

Encoded and proofread by Sunder Hattangadi sunderh at hotmail.com

Please send corrections to sanskrit@cheerful.com

Last updated त्oday

http://sanskritdocuments.org

Veda Vyasa Ashtakam Lyrics in Devanagari PDF
% File name : vyasa-8.itx
% Category : aShTaka
% Location : doc_deities_misc
% Author : ?
% Language : Sanskrit
% Subject : philosophy/religion/hinduism
% Transliterated by : Sunder Hattangadi (sunderh at hotmail.com)
% Proofread by : Sunder Hattangadi (sunderh at hotmail.com)
% Description-comments : Homage to Veda Vyasa
% Latest update : August 25, 2007
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study

% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [December 16, 2015] at Stotram Website